# Sadbhih Krita Shri Hari Stuti

# સદ્ભિઃ કૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Sadbhih Krita Shri Hari Stuti

File name : sadbhiHkRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# સદ્ભિઃ કૃતા શ્રીહરિસ્તુતિઃ

ષટ્ચત્વારિંશત્તમે તરઙ્ગે લબ્ધાકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

સમ્બન્ધાત્તે નાથ વૃક્ષાઃ સરોઽદઃ સર્વે ચેમેઽત્રાધુના ભૂમિકેયમ્ ।
સૌધશ્ચાયં વાટિકા વાપિકેયં ધન્યં સર્વં ચાશ્રમઃ ક્ષેત્રમેતત્ ॥ ૧॥

ચિત્તં નોઽહન્ધીર્મનસ્ત્વક્ ચ નેત્રે ઘ્રાણં જિહ્વા કર્ણયુગ્મં ચ તીક્ષ્ણમ્ ।
એતાન્યન્યચ્ચાપિ સર્વં કદાચિદ્ વલ્ગન્ત્વન્યં ત્વાં વિના નૈવ ધાર્મે ॥ ૨॥

યસ્યાપારાઃ સદ્ગુણાઃ શુભ્રકીર્તિર્જ્ઞાનં ધર્મો યસ્ય વૈરાગ્યમીશ ।
ભક્તિર્યવાગ્ યચ્ચરિત્રાણિ યચ્છં યન્માહાત્મ્યં રૂપધામાનિ યસ્ય ॥ ૩॥

સર્વસ્યૈતસ્યાપિ લેશં ચ કિઞ્ચિદ્ વક્તું શેષો નામ દેવો હિ તસ્ય ।
શક્તસ્તે કિં દેવ્યપિ સ્યાચ્ચ તદ્ગીસ્તસ્યાઽઽનન્ત્યાત્ત્વાં તુ વન્દામહે યત્ ॥ ૪॥

કામઃ ક્રોધો દુસ્ત્યજો માનલોભૌ સ્વાદો ગર્યો મત્સરો દમ્ભ એતે ।
ઉર્જિષ્ઠા નઃ સઞ્જિતા દસ્યવોઽસ્મિઁસ્તાદૃક્તેજા યહ શૈકસ્ત્વમેવ ॥ ૫॥

જ્યોતિર્દીપ્તં ઘૂર્ણતે શૈશુમારં ચક્રં ચેદં યસ્ય સઙ્કલ્પતઃ ખે ।
નિત્યં તોયે કુઃ સ્થિરેયં સ્થિતાપિ ત્વં નઃ સ્વામી સ્મોઽસ્યતઃ સોઽતિધન્યાઃ ॥ ૬॥

તં તં તન્તુષુ ગ્રન્થિતોઽઙ્ગ ત્વય્યાધારેઽદઃ પટશ્ચેવ વિશ્વમ્ ।
ભિન્નોઽસ્યસ્માત્ત્વં તથાપીશ્વરો નો દૃષ્ટસ્ત્વય્યસ્યાપિ કો યદ્ગુણો ન ॥ ૭॥

સ્વામિન્ બ્રહ્માણ્ડાનિ વૈ કાલવેગાન્નાશં યાન્ત્યત્યોજસો યર્હિ ધાનિ ।
દિવ્યે જુષ્ટઃ શિષ્યતે વાસુદેવઃ સ્વૈઃ સ્વે યો નઃ પ્રાણવત્ સ પ્રિયઃ સ્તાત્ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે તૃતીયપ્રવાહે
પઞ્ચાશત્તમે તરઙ્ગે સદ્ભિઃ કૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

*Sadbhih Krita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*